# SANSKRIT ( संस्कृत )

## झारखण्ड (JAC) 2016 (A) बोर्ड परीक्षा में पूछे गये प्रश्न एवं उनके आदर्श उत्तर

Time : 3 Hours ] [ Full Marks : 100

**परीक्षा की तिथि : 27 फरवरी, 2016**

**सामान्य निर्देश :**

1. परीक्षार्थी यथासंभव अपने शब्दों में ही उत्तर दें। 2. सभी प्रश्नों के उत्तर लिखने हैं। 3. प्रत्येक प्रश्न के अंक उसके सामने अंकित हैं।
4. प्रश्नों के उत्तर प्रश्नों के साथ दिए गए निर्देश के आलोक में ही लिखें।

**विशेष निर्देश :**

(क) अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति। (इस प्रश्नपत्र में चार खण्ड हैं)

(ख) सर्वेषां प्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां निर्धारिते स्थाने क्रमेण एवं लेखनीयानि। (सभी प्रश्नों के उत्तर उत्तर-पुस्तिका में निर्धारित स्थान पर क्रम से ही लिखना है।)

(ग) सर्वेषां प्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लेखनीयानि। (सभी प्रश्नों के उत्तर निर्देशानुसार केवल संस्कृत में लिखने होंगे)

---

### खण्ड-'क' : अपठितांश अवबोधनम् (15 अंका:)

**प्र० 1. अधोलिखितम् अनुच्छेदद्वयं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशम् उत्तरत–( निम्नलिखित दोनों अनुच्छेदों को पढ़कर उस पर आधारित प्रश्नों का निर्देश के अनुसार उत्तर दें )**

(अ) प्रथम: अनुच्छेद:–एक: सिंह: आसीत्। स: सुप्त: आसीत्। एक मूषक: तत्रागत्या सिंहस्य केशान् कर्तितुमारभ्यत्। सिंहस्य निद्रा भंगो जात:। क्रुद्ध: सिंह: मूषकं हन्तुमैच्छत्। तदा मूषक: सिंहम् अवदत् – भो वनराज! दयां कुरु। मा जहि माम्। अत्रैव वसन् अहमपि भवत्सहायतां करिष्यामि। सिंह: विहस्य अवदत् – दुर्बल: सिंह: त्वं मां किं सहाय्यं करिष्यसि ? गच्छ त्वम्। त्यक्त: मया: त्वम्। मूषक: तत्रत: शीघ्रं पलायित:। एकदा व्याघ्रस्य जाले बद्धं सिंहं दृष्ट्वा मूषक: विस्मित: जात:। पूर्वापकारं स्मृत्वा मूषक: सिंहस्य जालम् अकृन्तत्।

**प्रश्ना: I. एकपदेन उत्तरत ( एक पद में उत्तर दीजिए )– 2×½=1**

(क) मूषक: कान् कर्तितुम् आरभ्यत् ?

(ख) व्याघ्रस्य जाले बद्धं सिंहं दृष्ट्वा मूषक: कथं जात: ?

**II. पूर्णवाक्येन उत्तरत ( पूर्ण वाक्य में उत्तर दीजिए )–2×1=2**

(क) सिंह: विहस्य किम् अवदत् ?

(ख) मूषकेन सुप्तं सिंहं दृष्ट्वा किम् अकरोत् ?

**III. यथानिर्देशम् उत्तरत ( निर्देशानुसार उत्तर दीजिए )– 4×½=2**

(क) क्रुद्ध: सिंह:' अनयो: पदयो: किं विशेषणपदम् ?

(ख) 'सबल:' पदस्य विलोमपदं गद्यांशात् चित्वा लिखत।

(ग) 'अत्रैव' इति पदस्य संधि-विच्छेदं कुरुत।

(घ) 'वसन्' इत्यस्मिन् पदे क: प्रत्यय: प्रयुक्त: ?

**(आ) द्वितीय: अनुच्छेद:–**

कालिदास: मेघदूतं रचितवान्। मेघदूते मानसूनविज्ञानस्य अद्भुतं वर्णनम् अस्ति। मानसूनसमय: आषाढ़मासात् प्रारभते। श्याममेघान् दृष्ट्वा सर्वे जना: प्रसन्ना: भवन्ति। मयूरा: नृत्यन्ति। मानसूनमेघा: सर्वेषां जीवानां कष्टम् अपहरन्ति। मेघनां जलं वनस्पतिभ्य:, पशुपक्षिभ्य:, किंवा सर्वेभ्य: प्राणिभ्य: जीवनं प्रयच्छति। मेघजलै: भूमे उर्वराशक्ति: वर्धते। क्षेत्राणां सिंचनं भवति। शुष्कभूमौ वर्षाया: बिन्दव: पतन्ति। भूमे: सुगंधितं वाष्पं निर्गच्छति। कदम्बपुष्पाणि विकसन्ति। तेषु भ्रमरा: गुञ्जन्ति। मृगा: प्रसन्नो भूत्वा इतस्तत: धावन्ति। चातका: जलबिन्दून् पिबन्ति। बलाका: पंक्तिं बद्ध्वा आकाशे उड्डीयन्ते। मेघदूते मेघ: यक्षस्य सन्देशं नयतु इति प्रार्थित:। मेघम् दृष्ट्वा वियोगी यक्षस्य मनांसि अस्थिरो अभवत्। मेघदूते कालिदास: वायुमार्गस्य ज्ञानबर्द्धकं वर्णनं करोति। अत: अस्माभि: मेघदूतम् अवश्यमेव पठनीयम्।

**प्रश्ना: (I) एकपदेन उत्तरत ( एक पद में उत्तर दीजिए )– 2×1=2**

(क) मानसूनविज्ञानस्य अद्भुतं वर्णनम् कुत्रास्ति ?

(ख) सर्वेषां जीवानां कष्टं के अपहरन्ति ?

**(II) पूर्णवाक्येन उत्तरत ( पूर्ण वाक्य में उत्तर दें )– 2×2=4**

(क) मेघानां जलं केभ्य: जीवनं प्रयच्छति ?

(ख) बलाका: आकाशे कथं उड्डीयन्ते ?

**(III) यथानिर्देशम् उत्तरत ( निर्देशानुसार उत्तर दें )– 4×½=2**

(क) 'वर्धते' इति पदे क: लकार: ?

(ख) 'गुञ्जन्ति' क्रियापदस्य कर्तृपदं किम् ?

(ग) 'कालिदास:' इत्यस्य पदस्य समास विग्रहं कुरुत।

(घ) 'प्रयच्छति' इति पदे क: उपसर्ग: प्रयुक्त: ?

**(IV) अस्य गद्यांशस्य कृते समुचितं शीर्षकं लिखत। 2**
(इस गद्यांश के लिए एक समुचित शीर्षक लिखिए)

### खण्ड-'ख' : रचनात्मकं कार्यम् (20 अंका:)

**प्र० 2. पत्रलेखनम्– 10×½=5**

**दीपमालाविषये मित्रं प्रति लिखिते अस्मिन् पत्रे रिक्तस्थानानि मञ्जूषाया: उचितै: पदै: पूरयित्वा लिखत–**
**( 'दीपावली' विषय पर मित्र के पास लिखे गए पत्र में रिक्त स्थानों को मंजूषा के उचित पदों से पूरा करके लिखें )**

| |
|---|
| **मञ्जूषा :** अजनयत्, खादितानि, मित्र, लिखामि, मया, च, प्रकाशस्य, देयम्, क्वचित्, दीपमाला। |

विकास विद्यालय:
राणा प्रताप छात्रावासत:
दिनांक: 15 फरवरी, 2016

प्रिय ........(i)........राकेश
सप्रेम नमस्ते !

अत्र कुशलं तत्रास्तु। अद्य अहं दीपमालाविषये........(ii)........। कुटुम्बमध्ये स्थित्वा ........(iii)........सहर्षं दीपमाला मानिता। अस्माकं गृहस्य अन्त: बहिश्च .......(iv)........पुञ्ज: उद्गत: आसीत्। क्वचिद् वलभा: ........(v)........ मोमवर्तिका, क्वचित् तैलदीपा: इति। वीथिमध्ये बहुविधिनां स्फोटानां विस्फोटनं महत् कुतूहलम् ........(vi)........। बमरूपा: विस्फोटास्तु भीतिं प्रसारयन्त: रणोत्सवमिव प्रथयन्ति स्म। विविधानि मिष्टान्नानि स्वयम् अपि अस्माभि: यथाकामं ........(vii)........ वत्सलानां मित्राणां गृहेषु ......(viii)........परिवेषतानि। मन्ये भवता अपि ससमारोहं ........(ix)........परिजनै: सह मानिता भवेत्। पत्रोत्तरं ........(x)........।

भवदीय: मित्रम्
अनुराग:

**प्र० 3. संवाद लेखनम्–अधोलिखितं संवादं मञ्जूषायां प्रदत्तपंक्तिसहायतया पूरयित्वा पुन: लिखत ( निम्नलिखित संवाद को मञ्जूषा में प्रदत्त पंक्तियों की सहायता से पूरा कर पुन: लिखें )– 5×1=5**

| **मञ्जूषा:** |
|---|
| (i) त्वं स्वस्थाने उपविश। |
| (ii) अद्य मार्ग: अवरुद्ध: आसीत्। |
| (iii) त्वं कुत: आगच्छसि ? |
| (iv) केन यानेन चालक: कारयानेन सह स्पर्धमान: आसीत्। |
| (v) किं मोटरद्विचक्रिकायान चालक: शिरसि शिरोत्राणं धृतवान् आसीत् ? |

वर्गाध्यापक:- मनोज ! ..................... (I) ........................?
मनोज:- गृहात् श्रीमन् ।
वर्गाध्यापक:- विलम्बं कुत्र जातः ?
मनोज:- श्रीमन् ! ..................... (II) ........................?
वर्गाध्यापक:- मनोज ! अद्य मार्गः कथम् अवरुद्धः आसीत् ?
मनोज:- श्रीमन् ! कारयानेन सह स्पर्धमानः एकः यानचालकः दुर्घटनाग्रस्तः जातः ।
वर्गाध्यापक:- मनोज ! ..................... (III) ........................?
मनोज:- श्रीमन् ! एकेन मोटरद्विचक्रिकायानेन चालकः कारयानेन सह स्पर्धमानः आसीत् ।
वर्गाध्यापक:- मनोज ! ..................... (IV) ........................?
मनोज:- न, न श्रीमन् ! तेनैव सः दुर्घटनायां मृतो जातः ।
वर्गाध्यापक:- मनोज ! ..................... (IV) ........................
सर्वे प्रयत्नशीलाः भवन्तु यत् कोऽपि शिरोत्राणं विना मोटरद्विचक्रिकायानं नैव चालयेत् ।

**प्र० 4. चित्रवर्णनम्–**
**मञ्जूषायां प्रदत्तशब्दसहायतया अधो अंकितस्य चित्रस्य वर्णनं संस्कृते पञ्चवाक्येषु कुरुत–** 5×2=10
**(मञ्जूषा में दिये गये शब्दों की सहायता से नीचे दिये गये चित्र का वर्णन पाँच संस्कृत वाक्यों में करें)**

| मंजूषा– क्षालयन्ति, नदी, मलिनं, पीत्वा, स्त्रियः, विषाक्तनि, प्रदूषिता, विलोयन्ते, जलम्, अवकरम्, वस्त्राणि, क्षिपति, पुरुषः । |
|---|



**(केवलं प्रज्ञाचक्षुर्भ्यः)**
**(केवल नेत्रहीन छात्रों के लिए)**

**प्रश्नः 'जन्तुशाला' इति विषयमधिकृत्य मंजूषापदसहायतया पंचवाक्यात्मकं संस्कृते अनुच्छेदमेकं लिखत– ('जन्तुशाला' इस विषय को लेकर मञ्जूषा के पदों की सहायता से पाँच वाक्यों में संस्कृत में एक अनुच्छेद लिखें)** 5×2=10

| मंजूषा : जन्तवः व्याघ्रादयः, दर्शनाय, जनसम्मर्दः, दृष्ट्वा, शिशवः, आह्लादयन्ति, सर्वेभ्यः, अवकाशे, रोचते, अतीव, गच्छन्ति । |
|---|

## खण्ड-'ग' : अनुप्रयुक्त व्याकरणम् (30 अंकाः)

**प्र० 5. अधोलिखितेषु वाक्येषु रेखांकितपदानां संधिविच्छेदं संधिं वा विधाय प्रदत्तस्थाने उत्तराणि लिखत–** 3×1=3
(निम्नलिखित वाक्यों में रेखांकित पदों में संधि विच्छेद अथवा संधि करके दिये गये स्थान में उत्तर लिखिए)
(क) विशालौ पर्वतौ + इव ।
(ख) सः सदा स्वच्छं वस्त्रं धारयति ।
(ग) तत्र एकः सरः + वरः अस्ति ।

**प्र० 6. अधोलिखितेषु वाक्येषु रेखांकितपदानां समासं विग्रहं वा कृत्वा प्रदत्तस्थाने उत्तराणि लिखत–** 4×1=4
(निम्नलिखित वाक्यों में रेखांकित पदों का समास-विग्रह या समास करके प्रदत्त स्थान में उत्तर लिखिए)
(क) विद्यालये महोत्सवः आयोज्यते ।
(ख) ग्रामस्य समीपं नदी प्रवहति ।
(ग) रामलक्ष्मणौ भ्रातरौ आस्ताम् ।
(घ) पीतम् अम्बरं यस्य सः समाराध्यः ।

**प्र० 7. अधोलिखितम् अनुच्छेदं कोष्ठकेषु प्रदत्तानां प्रकृति-प्रत्ययान् संयोज्य पूरयत–** (अधोलिखित अनुच्छेद को कोष्ठकों में दिये गये प्रकृति-प्रत्ययों को जोड़कर पूरा करें) 5 × 1 = 5
प्रातःकाले उद्यानस्य शोभा खलु (दृश् + अनीयर्) । शीघ्रं-शीघ्रं (चल् + शतृ) जनाः हर्षिताः भवन्ति । ते वायोः (शीतल + तल्) अनुभवन्ति । (पक्षु + इन्) मधुरं गायन्ति । बालकाः (बालक + टाप्) च कन्दुकेन क्रीडन्ति ।

**प्र० 8. तालिकादत्तपदानि संयोज्य संस्कृते पञ्च सार्थकवाक्यानि रचयत–** (तालिका में दिये गये पदों को जोड़कर संस्कृत में पाँच सार्थक वाक्यों की रचना करें) 5×1=5

| | | | |
|---|---|---|---|
| | वृथा | तरणताले | खादामि |
| | श्वः | उपवने | अगच्छम् |
| अहम् | ह्यः | छविगृहम् | न यापयामि |
| | यदा-कदा | प्रातराशम् | तरिष्यामि |
| | अधुना | कालम् | भ्रमामि । |

**प्र० 9. अधोलिखिते वार्तालापे रिक्तस्थानानि वाच्यानुसारं पूरयित्वा प्रदत्तस्थाने उत्तराणि लिखत–** (निम्नलिखित वार्तालाप में रिक्त स्थानों को वाच्यानुसार पूरा कर प्रदत्त स्थान में उत्तर लिखें) : 3×1=3
मालविका – अलके ! पश्य एतत् चित्रम् ।
अलका– मालविके ! मया चित्रं ...........(i) ..................
मालविका – अस्मिन् चित्रे बालकः किं करोति ?
अलका – मालविके ! चित्रे...........(ii) .................. पुस्तकं पठ्यते ।
मालविका– तत्र बालिका किं रचयति ?
अलका – बालिकया ...........(iii) .................. रच्यते ।

**प्र०10. अधोलिखितेषु वाक्येषु रिक्तस्थानानां पूर्तिः अङ्कानां स्थाने संस्कृतपदेषु समयलेखनं कुरुत–** (निम्नलिखित वाक्यों में रिक्त स्थानों की पूर्ति अंकों के स्थान पर संस्कृत पदों में समय लेखन करें) : 4×1=4
(क) गरीब रथ एक्सप्रेस .................. (7.00) वादने गच्छति ।
(ख) कालका मेल एक्सप्रेस ..............(9.30) वादने प्रस्थानं करोति।
(ग) राजधानी एक्सप्रेस अपराह्न .............. (3.45) वादने गच्छति ।
(घ) स्वर्ण जयन्ती एक्सप्रेस सायं ........... (5.15) प्रस्थानं करोति।

**प्र०11. अधोलिखितेषु वाक्येषु अङ्कानां स्थाने संख्यावाचक विशेषणपदानि प्रयुज्य उत्तराणि लिखत–** (निम्नलिखित वाक्यों में अङ्कों के स्थान पर संख्यावाचक विशेषण पदों का प्रयोग कर उत्तर लिखें): 4 × ½ = 2
(क) .................... (3) नार्यः तत्र किं कुर्वन्ति ?
(ख) रामायणे .................... (7) काण्डानि सन्ति ।
(ग) एकस्मिन् संवत्सरे .................. (12) मासाः भवन्ति ।
(घ) क्रीडाक्षेत्रे .................. (20) बालकाः क्रीडन्ति ।

**प्र०12. अधोलिखितानां वाक्यानां रेखांकितपदानां संशोध्य पुनः लिखत–** (निम्नलिखित वाक्यों के रेखांकित पदों को शुद्ध करके पुनः लिखें) 4×1=4
(क) विद्वान् सर्वत्र पूज्यन्ते ।
(ख) तस्य माता ओदनं पचसि ।
(ग) अहं श्वः चलचित्रम् अपश्यम् ।
(घ) धनस्य विना जीवनं व्यर्थं भवति ।

## खण्ड-'घ' : पठित अवबोधनम् (पठित अवबोधन) (35 अंकाः)

**प्र०13. अधोलिखितं गद्यांशं, श्लोकं, नाटयांशं च अधीत्य तदाधारितानाम् प्रश्नानाम् उत्तराणि यथानिर्देशम् उत्तरत्–** (निम्नलिखित गद्यांश, श्लोक और नाट्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर निर्देशानुसार दें)

**(अ) गद्यांशः–**अस्ति प्राप्य उभौ प्राचलत् । तत्रोपेत्य काष्ठपटले पटाच्छादितं देहे स्कन्धेन वहन्तौ न्यायाधिकारिणं प्रति प्रस्थितौ । आरक्षी पुष्टदेहः आसीत्, अभियुक्तश्च अतीव कृशकायः । भारवतः शवस्य स्कन्धेन वहनं तत्कृते दुष्करम् आसीत् । स भारवेदनया क्रन्दति स्म । तस्य क्रन्दनं निशम्य मुदितः आरक्षी तमुवाच – "रे दुष्ट ! तस्मिन् दिने त्वया अहं चोरितया मञ्जूषया गृहणात् वारितः । इदानी निजकृतयस्य फलं भुङ्क्ष्व ।"

प्रश्नाः (I) एकपदेन उत्तरत ( एक पद में उत्तर दीजिए )– 2×½=1

(क) आरक्षी कीदृशः आसीत् ?

(ख) कः अतीव कृशकायः आसीत् ?

(II) पूर्णवाक्येन उत्तरत ( पूर्ण वाक्य में उत्तर दीजिए )– 2×1=2

(क) उभौ पटाच्छादितं देहं स्कन्धेन वहन्तौ कुत्र प्रस्थितौ ?

(ख) तस्य क्रन्दनं निशम्य आरक्षी किम् उवाच ?

(III) यथानिर्देशम् उत्तरत ( निर्देशानुसार उत्तर दीजिए )– 4×½=2

(क) 'अतीव' इति पदस्य संधि-विच्छेदं कृत्वा लिखत।

(ख) 'कठिनम्' इत्यर्थे गद्यांशे किं समानार्थकपदं प्रयुक्तम् ?

(ग) 'इदानीं निजकृत्यस्य फलं भुङ्क्ष्व। अत्र अव्ययपदं किम् ?

(घ) 'क्रन्दति स्म' इत्यस्मिन् पदे कः लकारः प्रयुक्तः ?

( आ ) श्लोकः– गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः,
करी च सिंहस्य बलं न मूषकः॥

प्रश्नाः (I) एकपदेन उत्तरत ( एक पद में उत्तर दीजिए )– 2×1=2

(क) वायसः कस्य गुणं न वेत्ति ?

(ख) सिंहस्य बलं कः न वेत्ति ?

(II) पूर्णवाक्येन उत्तरत ( पूर्ण वाक्य में उत्तर लिखें )– 1

वसन्तस्य महत्वं कः जानाति ?

(III) यथानिर्देशम् उत्तरत ( निर्देशानुसार उत्तर दें )– 4×½=2

(क) 'गुणी' इत्यस्मिन् पदे कः प्रत्यय ?

(ख) 'काकः' इत्यर्थे कः पर्यायः श्लोके प्रयुक्त ?

(ग) 'निर्बलः' इति पदें कः उपसर्गः ?

(घ) 'वेत्ति' इति पदे कः धातुः ?

( इ ) नाट्यांशः–विदूषकः– (जनान्तिकम्) अहं पुनः पृच्छामि। (प्रकाशम्) किं नामधेया युवयोर्जननी ?

लवः– तस्याः द्वे नामनी।

विदूषकः– कथमिव ?

लवः– तपोवनवासिनो देवीति नाम्ना आह्वयन्ति, भगवान् वाल्मीकिः वधूरिति।

रामः– अपि च इतस्तावद् वयस्य ! मुहूर्त्तमात्रम्।

विदूषकः– (उपसृत्य) आज्ञापयतु भवान्।

रामः– अपि कुमारयोरनयोः अस्माकं च सर्वथा समरूपः कुटुम्बवृत्तान्तः ? (नेपथ्ये) इयती वेला सञ्जाता रामायणगानस्य नियोगः किमर्थं न विधीयते ?

उभौ – राजन् ! उपाध्यायदूतोऽस्मान् त्वरयति।

रामः – मयापि सम्माननीय एव मुनिनियोगः।

प्रश्नाः (I) एकपदेन उत्तरत ( एक पद में उत्तर दें )– 2×1=2

(क) कुमारयोः रामस्य च किं समरूपः आसीत् ?

(ख) मुनिनियोगः केन सम्माननीय कथितः ?

(II) पूर्णवाक्येन उत्तरत ( पूर्ण वाक्य में उत्तर दें )– 1

केषां कुटुम्बवृत्तान्तः समरूपः आसीत् ?

(III) यथानिर्देशम् उत्तरत ( निर्देशानुसार उत्तर दें )– 4×½=2

(क) 'पृच्छामि' इति पदस्य किं कर्तृपदम्?

(ख) 'भगवान्' इति पदे प्रकृति-प्रत्ययौ वियुज्य लिखत।

(ग) 'नाम्ना' इति पदे का विभक्ति प्रयुक्ता ?

(घ) 'भवान्' इत्यस्मिन् पदे कः मूलशब्दः अस्ति ?

**प्र014. अधोलिखितयोः कथनयोः भावम् उपयुक्तपदैः पूरयत–**
(निम्नलिखित कथनों के भाव उपयुक्त पदों से पूरा करें) 3+3=6

(क) भवति शिशुजनो वयोऽनुरोधात् गुणमहतामपि लालनीय एव।

अस्य भावः अस्ति यत् ............(i)......... महागुणयुक्तानां ............(ii)........ कृतेऽपि ........(iii).......... लालनीयाः भवन्ति।

(ख) सेवितव्यः महावृक्षः फलच्छायासमन्वितः।
यदि दैवात् फलं नास्ति छाया केन निवार्यते॥

अस्यः भावः अस्ति यत् फलच्छायायुक्त महान् ..............(i) .......एव रोपणीयः। यदि दैवात् फलं.........(ii) ......... तथापि...........(iii) ................... कोऽपि निवारयितुं न शक्नोति।

प्र015. अधोलिखितयोः श्लोकयोः अन्वयं पूरयित्वा उत्तराणि लिखत– (निम्नलिखित श्लोकों के अन्वय पूरा कर उत्तर लिखिए ) 1½+1½=3

( क ) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति॥

अन्वयः–मनुष्याणां ........(i)............ रिपुः आलस्यम् (अस्ति) ........(ii) ........... बन्धुः नास्ति, यं कृत्वा (नरः) न ........(iii) ..............

( ख ) एक एव खगो मानी वने वसति चातकः।
पिपासितो वा म्रियते याचते वा पुरन्दरम्॥

अन्वयः–एक एव ..............(i) ........ खगः चातकः वने ..............(ii) ............... (iii) .............. याचते वा। ............ पिपासितो वा म्रियते

प्र016. रेखांकितपदानि आधृत्य प्रश्न-निर्माणं कुरुत– 4×1=4
(रेखांकित पदों के आधार पर प्रश्न निर्माण करें )

(i) <u>प्रकृत्याः</u> सन्निधौ वास्तविकं सुखं विद्यते।

(ii) त्वं <u>मानुषात्</u> बिभेषि।  (iii) राजा <u>मुनिं</u> प्रश्नत्रयमपृच्छत्।

(iv) <u>शिविना</u> विना इदं दुष्करं कार्यं कः कुर्यात् ?

प्र017. अधोलिखितानि वाक्यानि कथाक्रमानुसारं पुनः लिखत– 8×½=4
(निम्नलिखित वाक्यों को कथाक्रम के अनुसार पुनः लिखें )

(i) भुक्ते च तस्मिन् तया तस्य शयन व्यवस्थापि कृता।

(ii) शक्तिकुमारः तां विधिवदुपयम्य नीतवान्।

(iii) स्नानशुद्धायातिथिये तैलामलकं प्रायच्छत्।

(iv) अस्ति द्रविडेषु काञ्ची नाम नगरी।

(v) शक्नोषि किमनेन शालिप्रस्थेन गुणवदन्नम् अस्मान् भोजयितुम्।

(vi) ततस्तया वृद्धदासी साभिप्रायमालोकिता।

(vii) पेयोपहारपूर्वं भोजनं घृतसहितौदनं व्यञ्जनं च तस्मै प्रदत्तवती।

(viii) तत्कथं नु गुणवद् विन्देयं कलत्रम्।

**प्र018. प्रसंगानुसारं रेखांकितपदानां शुद्धम् अर्थं विचित्य लिखत–**
(प्रसंगानुसार रेखांकित पदों का शुद्ध अर्थ चुनकर लिखें।) 3 × 1 = 3

(i) विमुक्ता सा भया व्याघ्रस्य <u>भामिनी</u>
(क) दामिनी (ख) भगिनी (ग) कामिनी

(ii) गुर्जरराज्यं <u>पर्याकुलं</u> जातम्।
(क) व्याकुलम् (ख) सम्पन्नम् (ग) विपन्नम्

(iii) <u>अम्भोदाः</u> बहवो हि सन्ति गगने।
(क) पादपाः (ख) मेघाः (ग) तारकाः।

## उत्तर

## खण्ड-'क' : अपठितांश अवबोधनम् (15 अंकाः)

1. ( अ ) I. (क) केशान् (ख) विस्मितः

II. (क) सिंह विहस्य अवदत – ''दुर्बल' मूषक त्वं मां किं सहाय्यं करिष्यसि गच्छ त्वम्। त्यक्त मया त्वम्।''

(ख) सुप्तं सिंह दृष्ट्वा मूषकः तस्य केशान् कर्तितुमारभत्।

III. (क) क्रुद्धः (ख) दुर्बलः (ग) अत्र + एव (घ) शतृ।

( आ ) (I) (क) मेघदूते (ख) मानसूनमेघाः।

(II) (क) मेघानां जलं वनस्पतिभ्यः, पशुपक्षिभ्य, किंवा सर्वेभ्यः प्राणिभ्यः जीवनं प्रयच्छति।

(ख) बलाकाः आकाशे पंक्तिबद्धाः हाउड्डीयन्ते।

(III) (क) लट् (ख) भ्रमराः (ग) काल्याः दासः (घ) प्र

(IV) मेघदूतम्।

## खण्ड-'ख' : रचनात्मकं कार्यम् (20 अंकाः)

2. (i) मित्र, (ii) लिखामि, (iii) भया (iv) प्रकाशस्य (v) क्वचित् (vi) अजनयत् (vii) खादितानि (viii) च (ix) दीपमाला (x) देयम्।

3. (i) त्वं कुतः आगच्छसि ? (ii) अद्य मार्गः अवरुद्धः आसीत्।
(iii) केन यानेन चालकः कारयानेन सह स्पर्धमानः आसीत्।
(iv) किं मोटरद्विचक्रिकायान चालकः शिरसि शिरोत्राणं धृतवान् आसीत् ?
(v) त्वं स्वस्थाने उपविश।

4. (i) एतत् चित्रं प्रदूषितनद्याः अस्ति।
(ii) तिस्रः महिलाः वस्त्राणि क्षालयन्ति।
(iii) एकः पुरूषः अवकरं क्षिपति।
(iv) नदी प्रदूषिता भवति। (v) जले विषाक्तानि विलीयन्ते।

## खण्ड-'ग' : अनुप्रयुक्त व्याकरणम् (30 अंका:)

5. (क) पर्वताविव । (ख) स्व + छं (ग) सरोवर:
6. (क) महान् च असौ उत्सव: / महान् उत्सव:
(ख) उपग्रामम् (ग) राम: च लक्ष्मण: च (घ) पीताम्बर:
7. (I) दर्शनीया (II) चलन्त: (III) शीतलतां (IV) पक्षिण: (V) बालिका: ।
8. (i) अहम् वृथा कालं न यापयामि ।
(ii) अहम् श्व: तरणताले तरिष्यामि ।
(iii) अहम् ह्य: छविगृहम् अगच्छम् ।
(iv) अहम् यदा-कदा उपवने भ्रमामि ।
(v) अहम् अधुना प्रातराशम् खादामि ।
9. (i) दृश्यते (ii) बालकेन (iii) चित्रं
10. (क) सप्त (ख) सार्धनव (ग) पादोनचतुर (घ) सपादपञ्चवादने
11. (क) तिस्र: (ख) सप्त (ग) द्वादश (घ) विंशति:
12. (क) पूज्यते (ख) पचति (ग) ह्य: (घ) धनं / धनेन / धनात्

## खण्ड-'घ' : पठित अवबोधनम् (35 अंका:)

13. (अ) (I) (क) पुष्टदेह: (ख) अभियुक्त:
(II) (क) उभौ पटाच्छादितं देहं स्कन्धेन वहन्तौ न्यायधिकारिणं प्रति प्रस्थितौ ।
(ख) तस्य कन्दनं निशम्य आरक्षी उवाच- "रे दुष्ट । तस्मिन् दिने त्वया अहं चोरितेय मञ्जूषया गृहणात् वारित: । इदानीं निजकृत्यस्य फलं भुङ्क्ष्व ।"
(III) (क) अलिन + इव (ख) दुष्करम् (ग) इदानीम् (घ) लङ्
(आ) (I) (क) वसन्तस्य (ख) पृथक:
(II) वसन्तस्य महत्त्वं वायस: न जानाति ।
(III) (क) इन् (ख) वायस: (ग) निर् (घ) विद्
(इ) (I) (क) वृत्तान्तम् (ख) रामेण
(II) लवकुशौ रामस्य च कुटुम्बवृत्तान्त: समरूप: आसीत् ।
(III) (क) अहं (विदूषक:) (ख) भग + मतुप् (ग) तृतीया (घ) भवत्
14. (क) (i) बाल्यावस्थाया: कारणात् (ii) मानवानां (iii) शिशुजन:
(ख) (i) वृक्ष: (ii) भवति (iii) छायाम्
15. (क) (i) हि (ii) उद्यमसम: (iii) अवसीदति
(ख) (i) मानी (ii) वसति (iii) पुरन्दरम् ।
16. (i) कस्या: (ii) कस्मात् (iii) कम् (iv) केन
17. (i) अस्ति द्रविडेषु काञ्ची नाम नगरी ।
(ii) तत्कथं नु गुणवद् विन्देयं कलत्रम् ।
(iii) शक्नोषि किमनेन शालिप्रस्थेन गुणवदन्नम् अस्मान् भोजयितुम् ।
(iv) ततस्तया वृद्धदासी साभिप्रायमालोकिता ।
(v) स्नानशुद्धायातिथये तैलमामलकं प्रायच्छत् ।
(vi) पेयोपहारपूर्वं भोजनं घृतसहितोदनं व्यञ्जनं च तस्मै प्रदत्तवती ।
(vii) भुक्ते च तस्मिन् तया तस्य शयन व्यवस्थापि कृता ।
(viii) शक्तिकुमार: तां विधिवदुपयम्य नीतवान् ।
18. (i) - (ग) कामिनी
(ii) - (क) व्याकुलम् (iii) - (ख) मेघा: